योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः १२५

पञ्चविंशत्यधिकशततमः सर्गः १२५

श्रीवसिष्ठ उवाच ।

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।

नाविद्यास्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ।। १

शान्त एव चिदाभासे स्वच्छे समसमात्मनि ।

समग्रशक्तिखचिते ब्रह्मेति कलिताभिधे ।। २

निर्णीय केचिच्छून्यत्वं केचिद्विज्ञानमात्रताम् ।

केचिदीश्वररूपत्वं विवदन्ते परस्परम् ।। ३

सर्वमेव परित्यज्य महामौनी भवानघ ।

निर्वाणवान्निर्मननः क्षीणचित्तः प्रशान्तधीः ।। ४

आत्मन्येवास्स्व शान्तात्मा मूकान्धबधिरोपमः ।

नित्यमन्तर्मुखो भूत्वा स्वात्मनान्तः प्रपूर्णधीः ।। ५

जाग्रत्येव सुषुप्तस्थः कुरु कर्माणि राघव ।

अन्तः सर्वपरित्यागी बहिः कुरु यथागतम् ।। ६

चित्तसत्ता परं दुःखं चित्तासत्ता परं सुखम् ।

अतश्चित्तं चिदेकात्मा नय क्षयमवेदनात् ।। ७

दृष्टा रम्यमरम्यं वा स्थेयं पाषाणवत्समम् ।

एतावतात्मयत्नेन जिता भवति संसृतिः ।। ८

संवेदनीयं न सुखं नासुखं न च मध्यमम् ।

एतावतात्मयत्नेन दुःखान्तोऽनन्त आप्यते ।।९

आपीनमण्डलशशाङ्कवदन्तरेव

श्रीमद्रसायनमयः सुखमेति तज्ज्ञः ।

विज्ञातसर्वभुवनत्रयवस्तुसारः

कुर्वन्न नाम कुरुते परमभ्युपेतः ।। १०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे पू० तुर्ये स्थैर्योपायकथनंनाम

पञ्चविंशत्युत्तरशततमः सर्गः ।।१२५।।